# AMRITA VIDYALAYAM
## ANNUAL EXAMINATION 2019 - 20

**Class : VI** **Marks : 80**
**Time : 2½ hrs**

# संस्कृतम्

निर्देशाः
अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
खण्डः क - अपठित अवबोधनम् - 10
खण्डः ख - रचनात्मक कार्यम् - 15
खण्डः ग - अनुप्रयुक्त व्याकरणम् - 25
खण्डः घ - पठित अवबोधनम् - 30

## खण्डः क - अपठित अवबोधनम्

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

एकस्मिन् ग्रामे कश्चित् निर्धनः युवकः आसीत्। तस्य नाम धनपालः आसीत्। सः प्रतिदिनम् भिक्षायै ग्रामं ग्रामं प्रति भ्रमति स्म। प्राप्तैः सक्तुभिः तस्य घटः पूर्णः अभवत्। सः घटं नागदन्ते अवलम्ब्य खट्वायां शयनं करोति स्म।

**I. एकपदेन उत्तरयत।** **2**

क. निर्धनः कः आसीत्?
ख. घटः कीदृशः अभवत्?

**II. पूर्णवाक्येन उत्तरयत।** **4**

क. युवकः प्रतिदिनम् किं करोति स्म?
**ख. सः किं कृत्वा कुत्र शयनं करोति स्म?**

**III. अस्य अनुच्छेदस्य एकं शीर्षकं लिखत।** **1**


**IV. भाषिककार्यम्।** **3**

क. 'निर्धनः युवकः' अनयोः पदयोः विशेषणपदं किम्?
ख. सः प्रतिदिनम् भिक्षायै ------ इति वाक्ये सः इति पदं कस्मै प्रयुक्तम्?
ग. भिक्षायै इत्यत्र का विभक्तिः?

## खण्डः ख – रचनात्मकं कार्यम्

**2. अधः प्रदत्तं चित्रं दृष्ट्वा प्रश्नानाम् उत्तराणि लिखत।** **5**

क. कः सीव्यति?



ख. कृषकः किं करोति?



ग. बालिका किं करोति?



घ. घटिका किं सूचयति?




ङ. एतानि कानि?



**3. मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा संस्कृतेन पञ्चवाक्यानि लिखत।** **5**

मञ्जूषा

(वृक्षः, धेनुः, काकः, मेघाः, उदेति, गृहम्, तृणम्)



**4. अधोदत्तं संवादं मञ्जूषायाः सहायतया पूरयत।** **5**

मञ्जूषा

(मातुलगृहे, किम्, श्रीराकेशः, विद्यालये, मोहनः)

रामः – त्वं कः असि?

मोहनः – अहं क. -------- अस्मि।

रामः – त्वं कुत्र पठसि?

मोहनः – अहं राजकीय ख. --------- पठामि।

रामः – तव पितुः नाम ग. ---------- अस्ति?

मोहनः – मम पितुः नाम घ. ----------- अस्ति।

रामः – त्वं कुत्र निवससि?

मोहनः –अहं ङ. ----------- निवसामि।

## खण्डः ग – अनुप्रयुक्त व्याकरणम्

**5. अधोलिखितेषु रेखाङ्कितेषु शब्देषु सन्धिविच्छेदं कुरुत।** **4**

क. <u>तत्रैव</u> अस्य निर्णयः भविष्यति।

ख. सः <u>अत्युच्चैः</u> चीत्करोति।

ग. <u>सर्वस्तरतु</u> दुर्गाणि।

घ. कुत्रचित् <u>धार्मिकोत्सवः</u> भवति।

**6. रिक्तस्थानानि पूरयत।** **5**

| | | | |
|---|---|---|---|
| क. | बालकाय | ----------- | ----------- |
| ख. | ----------- | ----------- | मुनिषु। |

ग. ----------- ----------- बालिकानाम्

घ. फलेन ----------- -----------

ङ. ----------- ----------- बालकान्

**7. उचित संख्या पदेन रिक्तस्थानानि पूरयत। 4**

क. --------- नक्षत्राणि भवन्ति। (27)

ख. कक्षायां -------- छात्राः पठन्ति। (44)

ग. वृक्षस्य उपरि --------- बकाः निवसन्ति। (50)

घ. आलुकस्य मूल्यं ---------- रूप्यकाणि सन्ति। (38)

**8. कोष्ठकदत्तस्य शब्दस्य उचितरूपं लिखत। 4**

क. -------- गृहम् कुत्र अस्ति? (रामम् / रामस्य)

ख. -------- मम रुचिः अस्ति। (भोजनाय / भोजने)

ग. -------- नमः। (शिवाय / शिवम्)

घ. -------- सह निखिलः उद्यानम् गच्छति। (अनुजायै / अनुजेन)

**9. अधोलिखित वाक्यानां लकार परिवर्तनम् करोतु। 3**

क. अहं विद्यालयं गच्छामि। (लङ् लकारे)

ख. ते अधावन्। (लट् लकारे)

ग. त्वं उद्यानम् गच्छ। (लृट् लकारे)

**10. मञ्जूषातः उचित अव्ययपदं चित्वा लिखत। 5**

मञ्जूषा

(अद्य, अधुना, प्रातः, कदा, सर्वदा)

क. -------- भ्रमणं स्वास्थ्याय भवति।

ख. -------- सत्यं वद।

ग. त्वं -------- मातुलगृहं गमिष्यसि?

घ. -------- विज्ञानस्य युगः अस्ति।

ङ. -------- रविवासरः अस्ति।

## खण्डः घ - पठित अवबोधनम्

**11. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

एकदा दश बालकाः स्नानाय नदीम् अगच्छन्। ते नदीजले चिरं स्नानम् अकुर्वन्। ततः ते तीर्त्वा पारं गताः। तदा तेषां नायकः अपृच्छत् - अपि सर्वे बालकाः नदीम् उत्तीर्णाः?

**I. एकपदेन उत्तरयत। 1**

क. कति बालकाः नदीम् अगच्छन्?

ख. नदीजले बालकाः किम् अकुर्वन्?

**II. पूर्णवाक्येन उत्तरयत। 1**

नायकः किम् अपृच्छत्?

**III. भाषिककार्यम्।** 3

क. 'बहुकालं यावत्' इत्यस्मिन् अर्थे अत्र किम् पदं प्रयुक्तम्?

ख. 'ते नदीजले स्नानम् अकुर्वन्' अत्र कर्तृपदं किम्?

ग. सर्वे बालकाः अत्र विशेषणपदं किम्?

**12. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

शाकमन्नं फलं दुग्धं दत्त्वा सर्वेभ्यः एव तौ।
क्षुधा तृषाकुलौ नित्यं विचित्रौ जनपालकौ ॥
सूर्यस्तपतु मेघाः वा वर्षन्तु विपुलं जलम्।
कृषिका कृषिको नित्यं शीतकालेऽपि कर्मठौ ॥

**I. एकपदेन उत्तरयत।** 1

क. कौ विचित्रौ स्तः?

ख. के वर्षन्तु?

**II. पूर्णवाक्येन उत्तरयत।** 1

कृषिकाः सर्वेभ्यः किं किं यच्छन्ति?

**III. भाषिककार्यम्।** 3

क. पिपासा इति पदस्य पर्यायपदं किम्?

ख. अलसौ इति पदस्य विलोमपदं किम्?

ग. तपतु इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम्?

**13. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

(ततः प्रविशन्ति नागरिकः श्यालः बद्धं पुरुषम् आदाय रक्षकौ च)

रक्षकौ – (ताडनस्य अभिनयं कृत्वा) अरे कुम्भीलक! कथय, कुत्र त्वया एतत् राजकीयम् अङ्गुलीयकं प्राप्तम्? एतस्मिन् तु राज्ञः नाम उत्कीर्णम् विद्यते।

बद्धपुरुषः – (भयस्य अभिनयं कृत्वा )भवन्तः प्रसीदन्तु। अहं न ईदृशः कर्मकरः।

जानुकः – किं शोभनः ब्राह्मणः इति मत्वा राजा तुभ्यं दानं दत्तवान्?

बद्धपुरुषः – श्रृणुत इदानीम्। अहं शक्रावतारस्य तीर्थस्य निवासी धीवरः अस्मि।

सूचकः – धूर्त! किम् अस्माभिः तव जातिः पृष्टा?

श्यालः – सूचक! सर्वं क्रमेण कथयतु। एनं मध्ये मा निवारय।

रक्षकौ – यथा भवान् आज्ञापयति।

**I. एकपदेन उत्तरयत।** 1

क. अङ्गुलीयके कस्य नाम उत्तीर्णम् आसीत्?

ख. कः शक्रावतारतीर्थस्य निवासी आसीत्?

**II. पूर्णवाक्येन उत्तरयत।** 1

श्यालः सूचकं किम् आज्ञापयति?

**III. भाषिककार्यम्।** 3

क. 'अस्ति' इति पदस्य किं पर्यायपदं किम्?

ख. पृष्टा इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम्?

ग. एकम् अव्ययपदं चित्वा लिखत।

**14. रिक्तस्थानानि पूरयत।** **5**

(उत्सवप्रियः, सरसा, स्वामी, ओक्टोबरमासे, अङ्गुलीयकम्)

क. पुष्पोत्सवस्य आयोजनम् -------- भवति।

ख. धीवरेण ---------- प्राप्तम्।

ग. भारतदेशः --------- अस्ति।

घ. --------- चतुरः आसीत्।

ङ. धरित्री ---------- जाता।

**15. अधोलिखितं कथांशं समुचितक्रमेण लिखत।** **3**

क. स्वामी अजीजाय अवकाशस्य पूर्णम् धनं ददाति।

ख. अजीजः सरलः परिश्रमी च आसीत्।

ग. अजीजः पेटिकाम् आनयति।

घ. एकदा सः गृहं गन्तुम् अवकाशं वाञ्छति।

ङ. पीडितः स्वामी अत्युच्चैः चीत्करोति।

च. मक्षिके स्वामिनं दशतः।

**16. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत।** **4**

क. सर्वः दुर्गाणि तरतु।

ख. सूर्यः तपतु ।

ग. जनाः पुष्पव्यजनानि समाधिस्थले अर्पयन्ति।

घ. नीलाकाशः अतिशयविस्तृतः अस्ति।

**17. अधोलिखितानां शब्दानां पर्याय पदेन सह मेलनं कुरुत।** **3**

| | | |
|---|---|---|
| क. | गेहम् | मौनम् |
| ख. | तूष्णीम् | रसहीना |
| ग. | शुष्का | गृहम् |